मयूरिका, स्त्री, ( मयूरवत् वर्णोऽस्त्यस्याः । मयूर +ठन् । टाप् । ) अम्बष्ठा । इति राजनिर्घण्टः ॥

मयूरी, स्त्री, ( मयूर + स्त्रियां ङीप् । ) मयूरस्त्रीजातिः । इति व्याकरणं लिङ्गादिसंग्रहश्च ॥ ( यथा, उत्तररामचरिते । ३ । ८ ।
"किमयमेऽपि निनदे कृतस्येऽपि त्वमीदृशी ।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता ॥")

मरकः, पुं, (म्रियन्ते जना यस्मात् । मृ + अपादाने अप् । ततः स्वार्थे संज्ञायां वा कन् । यद्वा, मृ + भावे अप् । मरो मरणमिति शब्देन कायति शब्दायते इति । कै + कः । ) मारिः । इति हेमचन्द्रः । २ । २३९ ॥ मड़क इति भाषा । तत्पर्य्यायः । मारी २ मारकः ३ । इति जटाधरः ॥( यथा, कामन्दकीयनीतिसारे । १३ । २० ।
"हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥" )
तस्य कारणादि यथा,—
"यावन्मार्त्तण्डसूनुर्गविमिथुनयोर्मध्यगे वाति मार्य्यां
तावद्दुर्भिक्षपीड़ा भवति च मरकं संश्रयं यान्ति लोकाः ।
हाहाकारास्तथोर्व्यां मनुजभयकरी फेरवावैश्च भीमैः
शून्यग्रामा भवेयुर्नरपतिरहिता भूरिकङ्कालमाला ॥
चक्रं करोति रविजो धरणीसुतो वा
मूलर्क्षहस्तमघरेवतिमैत्रभेषु ।
छत्त्रोपभङ्गपतनानि च सैनिकानां
सर्व्वत्र लोकमरणं जलधौतदेशः ॥
मांसास्थीनि समादाय श्मशानाद्गृध्रवायसाः ।
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ।
चौरैश्च हन्यते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रदृश्यन्ते तस्य देशस्य विद्रवः ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च ।
"वार्षिक्यमिभयं नैरिकरूपे च युद्धानि ।
दूर्व्वाकाण्डश्यामे हारिद्रे चापि निर्द्दिशेन् मरकम् ॥"
इति ग्रहणप्रकरणे तिथ्यादितत्त्वम् ॥
अन्यदपि ।
"रवाविन्दौ गजारूढ़ा शन्यङ्गारे तुरङ्गमे ।
नौकया गुरुशुक्राभ्यां दोलया बुधवासरे ॥
गजे च जलदा देवी छत्त्रभङ्गस्तुरङ्गमे ।
नौकायां शस्यवृद्धिः स्यात् दोलायां मरकं भवेत् ॥"
इति पत्रिकाप्रवेशफलकथने ज्योतिषम् ॥ * ॥
अस्य शान्तिः । देवीमाहात्म्यपाठः । वटुकभैरवस्तवपाठः । तुलस्या विष्णुपूजनञ्च । यथा,
"उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥"
इति मार्कण्डेयपुराणम् ॥
"मारीभये राजभये तथा चौराग्निजे भये ।
औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पः ॥
"महाघोरैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ! ॥
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तान्यशेषतः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"ॐ नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहेति ।"
इति ज्योतिस्तत्त्वम् ॥
( जातिविशेषः । यथा, मार्कण्डेये । ५८ । ५१ ।
"दार्व्वादा मरकाश्चैव कुरटाश्चान्नदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥" )

मरकतं, क्ली, ( मरकं मारिभयं तरत्यनेन । तॄ + डः । यद्वा, मरकं मरणं तनोतीति । लोभान्मरणमनादृत्य तस्मिन् रत्ने प्रवर्त्तते इति मरकतमिति स्मरन्तीति वृद्धाः । इत्यमरटीकायां भरतः । ) हरिद्वर्णमणिविशेषः । पान्ना इति भाषा ॥ तस्य देवता बुधः । इति ज्योतिषम् ॥ तत्पर्य्यायः । गारुत्मतम् २ अश्मगर्भम् ३ हरिन्मणिः ४ । इत्यमरः । २ । ९ । ९२ ॥ मरक्तम् ५ राजनीलम् ६ गरुड़ाङ्कितम् ७ । इति शब्दरत्नावली ॥ रौहिणेयम् ८ सौपर्णम् ९ गरुड़ोद्गीर्णम् १० बुधरत्नम् ११ अश्मगर्भजम् १२ गरलारिः १३ वापबोलम् १४ गारुड़म् १५ । कुत्रचित् पुस्तके गरुड़ोद्गीर्णस्थाने गरुड़ोत्तीर्णं वापबोलस्थाने वाप्रवालं इति च पाठः ॥ अस्य गुणाः । विषघ्नत्वम् । शीतलत्वम् । रसे मधुरत्वम् । आमपित्तहरत्वम् । रुच्यत्वम् । पुष्टिदत्वम् । भूतनाशकत्वञ्च ॥ * ॥ अस्य लक्षणम् ।
"स्वच्छञ्च गुरु सच्छायं स्निग्धं गात्रञ्च मार्द्दवसमेतम् ।
अव्यङ्गं बहुरङ्गं शृङ्गारी मरकतं शुभं बिभृयात् ॥"
तस्य कुलक्षणम् ।
"शर्करिलकलिलरूक्षं मलिनं लघु हीनकान्ति कल्माषम् ।
त्रासयुतं विकृताङ्गं मरकतममरोऽपि नोपभुञ्जीत ॥" * ॥
तस्य परीक्षा ।
"यच्छैवालशिखण्डिशाद्वलहरित्काचैश्च चाषच्छदैः
खद्योतेन च बालकीरवपुषा शैरीषपुष्पेण च ।
छायाभिः समतां दधाति तदिदं निर्द्दिष्टमष्टात्मकं
जात्यं यत्तपनातपेष्वपरितो गारुत्मतं रञ्जयेत् ॥"
इति राजनिर्घण्टः ॥ * ॥
ग्रन्थान्तरे तस्य परीक्षादि यथा,—
सूत उवाच ।
"दानवाधिपतेः पित्तमादाय भुजगाधिपः ।
द्विधा कुर्व्वन्निव व्योम सत्वरं वासुकिर्ययौ ॥
स तदा स्वशिरोरत्नप्रभादीप्ते नभोऽम्बुधौ ।
राजतः स महानेकः खण्डसेतुरिवाबभौ ॥
ततः पक्षनिपातेन संहरन्निव रोदसी ।
गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुमुपचक्रमे ॥
सहसैव मुमोच तत् फणीन्द्रः
सुरसाढ्युक्ततुरुष्कपादपायाम् ।
नलिकावनगन्धवासितायां
वरमाणिक्यगिरेरुपत्यकायाम् ॥
तस्य प्रपातसमनन्तरकालमेव
तद्व्द्वारालयमतीत्य रमासमीपे ।
स्थानं क्षितेरुपपयोनिधितीरलेखं
तत्प्रत्ययान्मरकताकरतां जगाम ॥
तत्रैव किञ्चित् पततस्तु पित्ता-
दुत्पत्य जग्राह ततो गरुत्मान् ।
मूर्च्छापरीतः सहसैव घोणा-
रन्ध्रद्वयेन प्रमुमोच सर्व्वम् ॥
तत्राकठोरशुककण्ठशिरीषपुष्प-
खद्योतपृष्ठचरशाद्वलशैवलानाम् ।
कह्लारशष्पकभुजङ्गभुजाञ्च पत्र-
प्रान्तत्विषो मरकताः शुभदा भवन्ति ॥
तद्यत्र भोगीन्द्रभुजा विमुक्तं
पपात पित्तं दितिजाधिपस्य ।
तस्याकरस्यातितरां स देशो
दुःखोपलभ्यश्च गुणैश्च युक्तः ॥
तस्मिन्मरकतस्थाने यत्किञ्चिदुपजायते ।
तत्सर्व्वं विषरोगाणां प्रशमाय प्रकीर्त्त्यते ॥
सर्व्वमन्त्रौषधिगणैर्यन्न शक्यं चिकित्सितुम् ।
महाहिदंष्ट्राप्रभवं विषन्तत्तेन शाम्यति ॥
अन्यमप्याकरे तत्र यद्दोषैरपवर्ज्जितम् ।
जायते तत् पवित्राणामुत्तमं परिकीर्त्तितम् ॥
अत्यन्तहरितवर्णं कोमलमर्च्चिर्व्विभेदजटिलञ्च ।
काञ्चनचूर्णस्यान्तःपूर्णमिव लक्ष्यते यच्च ॥
युक्तं संस्थानगुणैः समरागं गौरवेण विहीनम् ।
सवितुः करसंस्पर्शाच्छुरयति सर्व्वाश्रमं दीप्त्या ॥
हित्वा च हरितभावं यस्यान्तर्व्विनिहिता भवेद्दीप्तिः ।
अचिरप्रभाप्रभाहतनवशाद्वलसन्निभा भाति ॥
यच्च मनसः प्रसादं विदधाति निरीक्षितमतिमात्रम् ।
तन्मरकतं महागुणमिति रत्नविदां मनोवृत्तिः ॥
यस्तु भास्करसंस्पर्शात् हस्तन्यस्तो महामणिः ।
रञ्जयेदात्मपादैस्तु महामरकतं हि तत् ॥
चतुर्धा जातिभेदस्तु महामरकते मणौ ।
छायाभेदेन विज्ञेया चतुर्व्वर्णस्य लक्षणैः ॥" *॥